# Shri Shvetaranya Stutih

# શ્રીશ્વેતારણ્યસ્તુતિઃ

## Document Information

Text title : Shvetaranya Stutih 06 36

File name : shvetAraNyastutiH.itx

Category : navagraha

Location : doc_z_misc_navagraha

Proofread by : Musiri Janakiraman

Description-comments : From stotrArNavaH 06-36

Latest update : July 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીશ્વેતારણ્યસ્તુતિઃ

શ્રીમત્કીર્તિપવિત્રિતત્રિજગતશ્વેતસ્ય રક્ષાચ્છલા(જગતઃ શ્વેતસ્ય)
ચ્છ્વેતારણ્યપુરે ચિરાય વિહરન્ દેવો વિભૂત્યૈ ભુવઃ ।
સત્યજ્ઞાનસુધૈકમૂર્તિરખિલાનર્થાન્ કૃતાન્તદ્વિષન્
દાતા મે ભવતાદપારકરુણાપીયૂષપાથોનિધિઃ ॥ ૧॥

શ્રીમાનદ્ભુતસત્કવિત્વપદવીનિત્યાધ્વનીનો વશી
યો જાગર્તિ જગત્પ્રકાશમહિમા વીરઃ પ્રકાશેશ્વરઃ ।
તસ્ય શ્રીરવિવર્મદેવનૃપતેર્વાચા કૃતાન્તદ્રુહઃ
શ્વેતારણ્યવિહારિણો ભગવતઃ સેવાક્રમો વક્ષ્યતે ॥ ૨॥

જય જય જગદેકનાથ જનિમરણજલધિતરણપોતાયમાનકરુણાકટાક્ષલેશ નિશાકરકલાપીડ વિશાલતરભક્તિનિરતિશયશ્વેતમા
નિશાતશૂલવિદારિતકૃતાન્તભુજાન્તરાલસ્ય ભગવતઃ પરક્રોડપુરે પરિક્રીડમાનસ્ય ચરણસરસિજયુગલમગલિતાદરમનુદિનમુપાસે
ઉદયશૈલશિખરમધિરુક્ષત્યુપચિતતમઃપટલપાટનોદ્વેગિનિ ઉદ્વેલવિયોગવેદનાકલુષિતચક્રવાકમહિલાચક્રવાલસમ્પ્રેક્ષ્યમાણોદયે
ભગવતિ દિવાકરે સપદ્યુજ્જૃમ્ભમાણપ્રાભાતિકમહિતમઙ્ગલશઙ્ખધ્વનિશ્રવણવિદ્રાણનિદ્રાવિશેષસમધિકમનઃપ્રસાદઃ
સમુત્થાય સમાહિતાત્મા સકલલોકપ્રસિદ્ધમત્યન્તપુણ્યં શ્વેતારણ્યં પુરોત્તમમુત્તરેણ પ્રકાશમાનમપ્રમેયાનુભાવપ્રકાશભૂપાલમૌલિ
માહાજનિકકર્મણા મહારાજેન રામવર્મણા નિર્માપિતમમ્લાનપરાક્રમપ્રસરપ્રતિહતપ્રતિમપક્ષશર્મણા
ચાતુરાશ્રમ્યધર્મૈકવર્મણા પરિતઃ પ્રકલ્પિતાનલ્પશિલ્પબન્ધુરોદારમણિશિલાબન્ધં સર્વકાલમનોહરં
સરોવરમવગાહ્ય કૃતાપ્લવઃ શનૈરુત્તરગોપુરદ્વારેણાન્તઃ પ્રવિષ્ટો વિમલકાન્તકમલાકરાન્તરવગાહવારિકૃતવિગ્રહઃ
સમગ્રકલ્યાણોદયકારણસ્ય દેવસ્ય કારણેશ્વરસ્ય પુરઃ પરિભ્રાજમાને નભસીવ સદા ગ્રહસત્કદમ્બકશોભમાનમાનસ
ઇવ સ્ફુરદવદાતપ્રકાશરાજહંસાવતરભાસુરે કાલજરણકેલિકલિતયૌગિકાભિધાને નિરવધિકદુરિતપુઞ્જભઞ્જને
કારઞ્જરમહાતીર્થે વિહિતમઙ્ગલસ્નાનવિધિરુભયતઃ સલિલસમ્ભેદસમ્ભૃતરામણીયકમધિષ્ઠાય મણિકુટ્ટિમમનુષ્ઠિતપ્રગેતનક્રિય
શુચિભસિતવિહિતશિરોવ્રતઃ ત્રિમૂર્તિમયત્રિપુણ્ડ્રકધારણપવિત્રિતગાત્રઃ તમેવ ભગવન્તમુમાકાન્તં શ્રીકારણપુરેશ્વરં
પુરસ્તાદુપતિષ્ઠે ॥ ૩॥

તતશ્ચ નિર્ગતસ્તેનૈવ માર્ગેણ ઉત્તરગોપુરબહિષ્ઠસ્ય સરોવરસ્યૈવ પશ્ચિમતીરે વિરાજમાનં દુશ્ચ્યવનવૈરિસીમન્તિનીજનસાન્તાપિકા
માન્ધાતૃમઙ્ગલમપુરીમણ્ડનં પુણ્ડરીકાક્ષમભિવન્દ્ય વૃત્તઃ પ્રણતજનતાનિર્વાણકારણસ્ય દક્ષિણતો
વર્તમાનં તદીયપાદારવિન્દન્યાસવિભાસ્વરં વૈરપુરકુટજારણ્યમધ્યમભવનાભિધાનં પુરત્રયં પરિષ્કુર્વાણં

પુરત્રયવૈરિણં ક્રમેણ પ્રણમ્ય શ્રીમત્પુરે ક્રોડપુરોત્તરદ્વારપાર્શ્વસન્નિહિતસ્ય નિઃસીમકરુણાસાગરસ્ય સાગરસુતાસુકૃતાવલેપલક્ષણવક્ષઃસ્થલસ્ય શ્વેતમુનિપરિરક્ષણાય કિલ સમાસેદુષો વિષયમયતિમિઙ્ગિલસઙ્કુલભીષણભવામ્બુ
નાવાપુરનાયકસ્ય નરકાન્તકસ્ય ચરણસરસિજદ્વન્દ્વમભિવન્દે ॥ ૪॥

અવસ્થાય ચ તત્રૈવ પુનરવહિતકરણકલાપો દક્ષિણદિશાભિમુખો દૈવાયવૈવસ્વતવામલોચનાવૈધવ્યવ્રતોપદેશદેશિકાય વિહિતપ્રણામાઞ્જલિરનવરતનિષેવણોત્સુકાયમાનજનતાછનસઙ્ક્ષુણ્ણયા પ્રદક્ષિણસરણ્યા સઞ્ચરમાણે દક્ષિણેન પુરોત્તમમક્ષીણશિક્ષાવિશેષધુરીણતક્ષવરકરકૌશલીસીમાનં અક્ષામરક્ષાનુલેપધવલાં અત્રિકરાલગરલાયુધમણ્ડલિમણ્ડનાં અધિકસુકુમારકરારવિન્દકલિતનિશિતશિખત્રિશિખશિખરનિર્ભિદ્યમાનકઠોરકીનાશવક્ષઃપીઠામયિત્વર્ય (?) અપ્રતિમાં પ્રતિમાં શૈલીં પ્રણિપત્ય પ્રતિષ્ઠમાનોદક્ષિણાપરસ્યાં હરિતિ હરિદુપલમણિપ્રકાશચૌરિકાધૌરેયકશરીરં મૃદુકુટિલનીલકચનિચયનિબન્ધનવખણ્ડમણ્ડલમિન્દિરપટલવિલસદલકાઞ્ચલસશ્ચલનશઙ્કુમાનપઙ્કેરુહાયતવિલોચનં ઇન્દુકિરણસુન્દરમન્દહાસમમિતમ્પચમદનાવેશવશંવદપશુપાલબાલિકાકુચકલશઘુસૃણપઙ્કિલતુઙ્ગવિશાલભુજાન્તરવલમાનતુ
ઉન્નિદ્રકાન્તિભરહારિદ્રવસનપ્રભાપરિહસિતક્ષણપ્રભાવિલાસમતિવેલરુચિરચામીકરનૂપુરપરિષ્કૃતપાદપલ્લવમધરિતસુધારસમ
ગોશાલવિહારિણં ભગવન્તં નન્દનન્દનમુપાસે ॥ ૫॥

પુરતશ્ચ તસ્ય પુરુષોત્તમમત્તકાશિનીરૂપનિસ્તુલગાત્રલક્ષ્મીનિરીક્ષણક્ષણસમેધમાનમનોભવાવેશવિવશીકૃતશશિશેખરપોષપીયૂ
ઇન્દિરારમણપ્રસાદૈકમન્દિરં ઇન્દ્રારિવીરભયઙ્કરકરસરસીરુહવિરોચમાનશરશરાસનમુત્કટબુક્કનધ્વાનનિર્ધૂયમાનભક્તભયકુક્કુ
ભૂતનાથં પ્રણિપાતપુરઃસરં પ્રદક્ષિણીકૃત્ય તત ઉત્તારાં મુક્તનિખિલદોષેણ લુપ્તવિષયાભિલાષેણ ભક્તજનેનાધિષ્ઠિતસ્ય સ્ફુરદતુલવિમલવિવિધવૃન્દસુન્દરસ્ય બલિપીઠિકામન્દિરસ્ય પશ્ચાત્ પ્રાઙ્મુખતયા અવસ્થાય સમસ્તાધારભૂતાય નિરસ્તાનર્થાય કાર્ત્તાન્તભયાક્રતન્તશ્વેતમુનિપરિરક્ષણાર્થમવનીલોકમલઙ્કૃતસાત્વતાયા મહેશ્વરાય શિરસિ વિરચિતાઞ્જલિઃ સાષ્ટાઙ્ગપાતં નમસ્કૃત્ય પ્રત્યક્પ્રતિહારમાર્ગેણ શનૈરન્તઃપ્રવેષ્ટુમુપક્રમે ॥ ૬॥

ઉભયતશ્ચોપવિષ્ટૈઃ ખણ્ડિતસાંસારિકાભિલાષૈરવિરતવિહિતભગવદુપાસનાવિશુદ્ધચિત્તૈરવનિદેવવિશિષ્ટૈઃ અનુમોદિતપ્રવેશઃ પ્રશસ્તભસિતવિરચિતત્રિપુણ્ડ્રમણ્ડને વિદ્યોતમાનરુદ્રાક્ષમાલાભારિણા શશ્વદભ્યસ્યમાનશતરુદ્રીયેણ પાવનપઞ્ચાક્ષરમહામન્ત્રસન્તતજપાસક્તચિત્તેન સતતસઙ્કીર્ત્યમાનભગવન્નામધેયેન વિપુલભાગધેયેન પરમશિવપદારવિન્દદ્વન્દ્વનિરન્તરધ્યાનજનિતસ્વરૂપાનન્દાનુભવવિગલદશ્રુધારાવિલવદનેન મહતા ભક્તવર્ગેણ નિત્યવિરાજિતસ્ય સત્યલોકસ્યેવ ચતુરાનનોચાર્યમાણત્રયીવિદ્યાપાવનસ્ય શ્વેતદ્વીપસ્યેવ નિત્યપ્રસાદવિકસ્વરનેત્રનારાયણસનિધ
રાશિચક્રસ્યેવ સદામન્દભાસ્વદ્ગોત્રોદ્ભવબુધગુરુકવિદ્વિજાધિપમણ્ડિતસ્ય મણિમણ્ડપસ્ય પશ્ચાદવસ્થિતઃ કિઞ્ચિદાલક્ષ્યમાણવિગ્રહં સર્વલોકૈકનાથં શર્વાણીસુચરિતાભોગસર્વસ્વં નિર્વાસિતકૃતાન્તગર્વોદયમીશ્વરં નમસ્કુર્વે ॥ ૭॥

તતશ્ચ પ્રાદક્ષિણ્યક્રમાદુત્તરતો ગચ્છન્નુત્તરદ્વારમાર્ગસ્ય પશ્ચાદેવ સ્થિતમુપસ્થાયુક્તજનસમસ્તાનર્થનિર્વર્તકમુત્તુઙ્ગરજતપર્વત..?
ર્વં? સર્વઙ્કુષધામાનં ઉચ્ચતરકકુદશિખરલમ્બમાનમન્દારમાલિકાનિર્ઝરોદ્ગારપ્રવર્ધમાનપ્રભામણ્ડલમઙ્કાવસક્તગાઙ્ગેયકિઙ્કિણીદ
તાપશોભિતં(?) સર્વેશ્વરોપવાહ્યં શ્રીનન્દિનામાનં અપરિમેયમાહાત્મ્યભૂમાનં પ્રત્યક્ષધર્મમૂર્તિં મહોક્ષં પ્રણમ્ય પ્રાઙ્મુખં

કિઞ્ચિદુપગમ્ય ભગવત્પ્રાસાદાગ્રજાગ્રચ્છાતકુમ્ભકુમ્ભપ્રણામાનન્તરયથાગતમાવર્તમાનઃ સુમુખિનીયસમસ્તનાથાય નિબદ્ધાઞ્જલિઃ શર્વવામાઙ્કમઙ્ગલાલઙ્કારાંસર્વમઙ્ગલાં નમસ્યામિ ॥ ૮॥

તતો હસ્તં (હં તુ) દક્ષિણેન પથા પ્રાચીનં (પ્રાચ્યાં) દિશિ પ્રસ્તુતપ્રચારઃ દક્ષિણતો દીવ્યમાનાપ્યાનતનુકારિસન્તાનદૂરીકૃતસિન્દૂરપૂ અસ્તિમિતકર્ણયુગલસમીરણગતાગતકેલિડોલાયમાન ઇવ ચ ચક્રમત્તમાતઙ્ગવક્ત્રં ભગવન્તં દ્વૈમાતુરં સમાતૃવર્ગં સમાનમ્ય તત્સવિધવર્તિનં દુઃસહભવવેદનાસમુત્સારણદક્ષિણં દક્ષિણામૂર્તિં દક્ષિણભિત્તિભુવિ ચિત્રનિવેશિતાકારં ચિત્રીયમાણચરિત્રસન્તાનમનન્તં અનન્તાનન્દચિદ્ઘનં અનન્તશાયિનં ચિરન્તનં પુમાંસં પ્રણિપત્ય તથૈવ ગત્વા વિહિતચણ્ડેશ્વરપ્રણામવિધિઃઆવૃત્તિપથાભિવન્દિતસ્ય દન્તાવલવદનસ્ય ભવનમુત્તરેણ ભક્તજનદુસ્તરહસ્તાપવિસ્તારર્તનકર્તરીમરાલકોમલકાલિમોષચિતકેશપાશનવવલાહકજાલવલાકાયમાનશેખરશશાઙ્કલેખામ અખિલવિબુધલોકવતંસીકૃતપાદારવિન્દામ અનેકવિભૂષણમણિમયૂખજાલશબલિતાકારામાકરમિવ સૌન્દર્યસ્ય, આભોગમિવ સૌભાગ્યસ્ય, નિલયમિવ વિલાસલક્ષ્મ્યાઃ, વિલયમિવ વિપદુદયસ્ય, પરમશિવપરમશક્તિભૂતાં ભવાનીમભ્યવર્તિનં ચ વિસ્તીર્ણદુરિતનિકરદાવશિખિનં શિખિવાહનં શિરસા પ્રણમામિ ॥ ૯॥

ઉત્તરેણ ચ દેવીમત્યુદારબહુવિધસ્તુતિવચનમુખરિતમુખૈર્મહાશૈવૈઃ અનવરતમશૂન્યોપકણ્ઠં સોપાનદેશમધિગમ્ય સમ્યગવનમ્રમસ્તકસ્થલસન્ન્યસ્તપ્રણામાઞ્જલિરુત્તંસીકૃતમુગ્ધમૃગાઙ્કલેખાનિર્મલપ્રભાવલેપદત્તહસ્તનિસ્તુષાનેકપ્રદીપજાલપ્રક અખિલભુવનસુચરિતાભોગમિવ ગૃહીતવિગ્રહં ઉદ્ગ્રગર્વોદયદુર્વારપરેતરાજજીવનગ્રસનરસિકસદરુણકોમલપાણિપઙ્કેરુહં શ્રીમત્પુરક્રોડપુરવિહારિણં અશેષલોકૈકકારણં પરમશિવમવનમામિ ॥ ૧૦॥

નિષ્ક્રાન્તશ્ચ પુરોત્તમાદ્વિહિતનિખિલદૈવતપ્રણતિઃ કૃતદેવયાત્રઃ કુહચન વિહતાન્તરાયે વિવિક્તે પ્રદેશે ભગવત્પદપયોજ એવ નિવેશિતમાનસઃ કમપિ સમયં વિશ્રામ્યામિ ॥ ૧૧॥

લમ્બમાને ચ પુનરમ્બરપથાદમ્બરમણૌ નિષ્ક્રમ્ય તસ્માદુત્તરલભસલપાલિકમ્બલિતગગનતલેન આરામવર્ત્મના કૌબેરીં કકુભં પ્રતિષ્ઠમાનો નાતિદૂર એવ નવીનબિસકુસુમાભિરામસુષમાં ઉગ્રતરવિક્રમક્રશિતશક્રપરાક્રમસમુદ્ધતકાસારાસુરજી અહાર્યશૌર્યગરિમોષ્માયમાણભુજાસમ્ભારસમ્ભૂતાહમ્ભાવભાસુરશુમ્ભનિશુમ્ભાસુરડમ્ભોદયનિષ્કલીકરણનિષ્કરુણાં ચરણનલિનનિષેવણપરાયણજનતાસકલમઙ્ગલદાયિનીં અલ્પેતરાક્રાન્તપદ્મપદ (પદ્મપાદ) મુનિપરિપાલનચ્છદ્મના (?) વિશ્વલોકભવાયાવિર્ભૂતાં શર્કરવરારામવિહારિણીં કાત્યાયનીમુપાસે ॥ ૧૨॥

તતઃ પશ્ચિમાયામાશાયાં આશાપાલમૃગલોચનાજનબલાપકારકચગ્રાહજાગ્રદુદગ્રપરાક્રમદારુણદારુકનામદાનવેશ્વરદાવાનલહેલ ..... તકાલિકાં અમલમરકતશિલાતલપ્રતિમલ્લગણ્ડમણ્ડલપ્રતિબિમ્બિતલમ્બમાનમહાવેતણ્ડકુણ્ડલાં આત્મપદનિષેવણપ્રવણક્ષોણિદેવપ્રવરાનુજિઘૃક્ષયા તદુપસર મુપસેદુષીમનુવત્સરવર્તમાનવલ્ગુતરફલ્ગુનીયાત્રાસમાગતમહાજન અપ્રતિમભક્તિભરિતપિપ્પલગ્રામનિર્ભરવિલસદગદઙ્કારપુઙ્ગલમઙ્ગલકુલદેવતામતિવિપુલસઙ્ક્રમાભિધાનપરમારામવિરચિત સમરમુખસરભસપરિહિણ્ડમાનચણ્ડમુણ્ડમહાસુરમુણ્ડપિણ્ડખણ્ડનપણ્ડિતમણ્ડલાગ્રકોદણ્ડમણ્ડલાગ્રપ્રચણ્ડભુજદણ્ડાં ચામુણ્ડાં ચાભિવન્દ્ય પુનઃ કારઞ્જરાખ્યે મહાતીર્થ એવ સાયન્તનં વિદધે ॥ ૧૩॥

સાન્ધ્યમહનિષેવણકુતૂહલસમાગતસ્ય મહાજનકસ્ય મહતા કલકલેન કિઞ્ચિદુન્મનાયમાન ઇવ પ્રવિશ્યાભ્યન્તરમભિતઃ સોપાનમવતિષ્ઠમાનૈઃ અતિવેલભક્તિભારવિનમ્રકન્ધરૈરનેકશઙ્ખવેણુકાહલમુખમુરજમુખવિચિત્રવાદિત્રનિનદભેદવ્યતિકરિતજ

અધીયદ્ભિઃ ઋગ્યજુષી ગાયદ્ભિઃ સામાથર્વ ભાવયદ્ભિઃ ભાગીરથીદેવતાભઞ્જનં વર્ણયદ્ભિઃ પુણ્યજનાધિરાજભુજવનાટોપપાટ અવ્ય[ચ્યુત]થરથાઙ્ગવિશ્રાણનોદન્તં વ્યાચક્ષાણૈર્દક્ષાધ્વરવિધ્વંસસંરમ્ભં શીલયદ્ભિઃ કાલકૂટક્ષ્વેલકબલીકારકારુણ્યમભ્યસ્યમ રભસસઞ્ચારસંહારિત્રિપુરીનિવાસનદુરાસદદેવારાતિવીરવિશસનાપદાનં ચિન્તયદ્ભિરન્ધકમહાસુરમથનાનુભાવં સંવદદ્ભિઃ શમ્બરપરિપન્થિશરીરશાતનં પાઠયદ્ભિઃ પાર્વતીપરિણયપરમોત્સવાડમ્બરં પ્રપઞ્ચયદ્ભિઃ વિરિઞ્ચિશિરઃકર્તનલીલાં પ્રશંસદ્ભિઃ પ્રકૃતિનિરવગ્રહપ્રેતરાજ નિરુપમાહોપુરુષિકાવિલોપનવૈભવમુપવીણયદ્ભિઃ ઉપશ્લોકયદ્ભિઃ નદદ્ભિઃ નન્દદ્ભિઃ નૃત્યદ્ભિશ્ચ ભક્તજનૈઃ અસઙ્ખ્યૈઃ નિવસિતેન[નિબિડિતેન]પથા સમેત્ય બદ્ધાઞ્જલિઃ અસ્તશૈલવિલીયમાનસવિતૃસમર્પિતપ્રભાતિશયપ્રદીપપ્રકરજ્વાલાજાલજાજ્વલ્યમાનકનકાભરણસુષમાનુવિદ્ધમ સત્યજ્ઞાનાનન્દરૂપમ્ભગવન્તં મૃત્યુઞ્જયમત્યાદરેણ પ્રણમામિ પ્રણમામિ ચ ॥ ૧૪॥

જય જય જગદન્તકાન્તક દેવદેવ વેગજિતલોકનિરવધિકદુરિતભરતિમિરપ્રકરપ્રભાકર પ્રસીદ મયિ પ્રણમતિ પ્રણમતિ। । ત્વમેવ ખલુ સત્યવિજ્ઞાનરસૈકરૂપમનુપાધિકમદ્વિતીયમાત્મતત્ત્વમસિ । સ એવ પુનરપિ વિદ્યાવસ્થાયામગુણાન્તરસમ્પૃક્તસત્ત્વગુણપ્રતિબિમ્બિતાત્મા સકલસાક્ષિતામવલમ્બસે । ત્રિગુણપ્રધાનં ચ પ્રધાનતત્ત્વમધિષ્ઠાય મૂર્તિત્રયપરિગ્રહેણ જગતઃ સર્ગાદિકમાવર્તયસિ । સૃજ્યમાત્રાનુવેશેન ચ જીવભાવમાવહસિ । સન્તતં ચ નિયન્તૃત્વેન વર્તમાનો નિજપદપયોજમભજતાં બન્ધનં ભજતાં ચાનુગ્રહં વિદધાસિ । ઇચ્છયા ચ સ્વચ્છચેતસાં ભક્તિભાજાં તેષુ તેષુ વિવિધેષુ ક્ષેત્રેષુ સન્નિધત્સે । તેષુ તેષુ ચર્યશન્તેષુ [ચત્વરાન્તરેષુ] તે તે મહાત્માનં તૈસ્તૈઃ પ્રશસ્તૈર્વિધાનૈર્ભવન્તમેવ સમારાધ્ય તત્તદભિલષિતમશેષેણ લેભિરે ॥ ૧૫॥

તથા ચ કિલ કાર્તાન્તિકાદિષ્ટાદકાલમૃત્યોઃ અત્યન્તમુદ્વિજમાનો મુનિદારકઃ શ્વેતો નામ વિશ્રુતો વિશ્વજનીનશીલાત્ ભગવતો નારદાદવાપ્તમહામન્ત્રઃ તદુપદેશેન ભવન્તમેવ તન્નિરસનકર્મણ્યલઙ્કર્મીણં પ્રસાદયિષ્યન્ ઇલાતલ। પ્રથિતસ્ય નિલાનિકટવર્તિનઃ પિપ્પલતરોરધસ્તાત્ અપહસ્તિતદેવતાન્તરં ચિરાત્ તપસ્યતિ સ્મ । અવસિતપ્રાયે ચાયુષિ ભીષણાકારમવાચીનદિશઃ સમાયાન્તમવારણીયરભસાવલેપમન્તકમારાદુપલભ્ય ભયવિક્લબાત્મા સહસૈવ પલાયમાનઃ પારેનિલં પરિશોભમાનં નાવાક્ષેત્રં સમાસાદ્ય પુરાતનાનામપિ નવાનાં કવિમુખ્યાનામપિ તત્તદ્વિષયપ્રબન્ધવિમુખાનાં મહાયોગિનામૃષભદેવભુવામભિલાષેણ તસ્મિન્ કૃતસન્નિધાનં ભગવન્તં મધુકૈટભાન્તકં શરણમુપજગામ । સ ચ ભગવાન્ મહામાયાનિયન્તા શરણાગતં ઋષિકુમારં પરિપિપાલયિષુઃ "તાત, મા ભૈષીઃ । શ્રીકારણપુરેશ્વરસ્ત્વાં મહેશ્વર એવ પરિપાલયિષ્યતિ । તત્સવિધં ચ ભવન્તમહં પ્રાપયામિ ।" ઇત્યભિધાય તન્માત્રલક્ષ્યમૂર્તિઃ તમૃષિં કારણપુરોપકણ્ઠં પ્રાપય્ય "વત્સ નારદોપદિષ્ટેન પથા ભગવન્તં મહેશ્વરમારાધય" ઇતિ નિગદન્નેવ અન્તરધાત્ ॥ ૧૬॥

તત્રાન્તરે ચ પ્રરૂઢપ્રતિઘાવેશરૂક્ષતરાક્ષિપાતઃ સાક્ષાદ્વૈવસ્વતઃ પ્રચણ્ડેન ભુજદણ્ડેન સ્વદણ્ડમવગારમવગારમમુમભ્યપદ્યત । પ્રત્યાસન્ને સતિ દણ્ડધરે સ મહામનાઃ મહીયસા સાધ્વસેન "રક્ષ રક્ષ ભગવન્" ઇતિ ભવન્તમેવ ક્રોશન્નવનિતલે નિપત્ય નિજભુજદ્વયસસમ્ભ્રમસમૂઢસિકતામયીં ભવત્પ્રતિમામનન્યશરણો ગાઢતરમાલિલિઙ્ગ । તસ્મિન્ ક્ષણે ચ નિરતિશયદયામૃતપરિપ્લુતાન્તરાત્માપિ કૃતાન્તવિષયનિતાન્તપ્રવૃદ્ધરોષભીષણાકારઃ કારણપુરતઃ પ્રત્યક્ષમેવ નિર્ગત્ય સિતભસિતાનુલેપદ્વિગુણિતશરીરદ્યુતિઃ સરભસસમાક્રમણપરિલોલુઠજ્જટાજૂટતટિનીતુઙ્ગતરતરઙ્ગસંસિચ્યમાનભુવ પ્રચલદતિભીષણભૂષણફણીશ્વરદ્રાધિષ્ઠનિઃશ્વાસવાતવ્યતિકરજાજ્વલન્નિટિલતટવિલોચનાનલજ્વાલામણ્ડલલેલિહ્યમાનગગના

કરતલકમલવિભ્રાજમાનજગત્ત્રયમયધારાત્રયોગ્રત્રિશૂલાગ્રવિસ્ફુરદનિલસખસ્ફુલિઙ્ગશતપિશઙ્ગિતદિશાવલયઃ પદવીવિન્યસ્તપદત્રયાન્તરપ્રમાણાનુમેયવર્ષ્મા તથાપતિતમૃષિદારકં કિલાભ્યવાપદ્યથાઃ । તત્કિલ પદત્રયં ત્રીણિ શિવક્ષેત્રાણિ સમવૃતન્ ॥ ૧૭॥

આદિત્સમાનં ચ જીવિતં મુનેરવાર્યવીર્યતયા ગર્વાયમાણં સર્વાભિભાવિનં પરેતરાજમતિનિશિતશૂલપ્રહારવિહ્વલમધિવસુધમપાતય
। ગાઢતરપ્રહારવેદનયા ચ ભુવિ વિવેષ્ટમાનસ્ય વિનષ્ટમાનસ્ય ચરણસરસિજસરભસસમાક્રાન્તસ્ય નિતાન્તતાન્તસ્ય જીવિતં જીવિતેશસ્ય સ્વાત્મન્યુપસઞ્જહર્થ। । ઉત્થાપિતં ચ મહાભાગધેયં સમાશ્વાસ્ય મુનિકુમારકમનુગૃહ્ય પરમયા કૃપયા તદીયકરયુગલસમાકલિતામેવ સૈકતીં મૂર્તિમધિતિષ્ઠન્નખિલલોકપ્રતીતઃ શ્રીમત્પરક્રોડેશ્વર ઇતિ શાશ્વતં નામધેયમાબિભ્રાણઃ પ્રકાશસે ॥ ૧૮॥

સ ત્વમપારસંસારપરિભ્રમણજનિતવિવિધવેદનાવિવશચેતસમનન્યગતં શરણાગતમનુગૃહાણ ભગવન્નમું જનમ્ । અવિકલપુરુષાર્થદાયી ભવદીયપદામ્બુજે મમ નિરુપમાધિકો ભવતુ ભક્તિરસઃ । જય જય જગદીશ્વર પાહિ પાહિ સકલનિષ્કલરૂપાય સકલનાથાય ભગવન્નમસ્તે નમસ્તે ઇતિ પ્રણુત્ય સાયન્તનબલિમહાય બહિર્નિષ્ક્રાન્તં નિરન્તરપ્રહતબહુવિધમહાવાદ્યનિવહનિર્ઘોષનિર્ભિદ્યમાનભુવનકટાહમચ્છિદ્રુરસમુચ્ચરદુચ્ચતરસ્તુતિશતાલાપવાચાલજનતાસમ
ભગવન્તમન્વીયમાનસ્ત્રિઃ પરીત્ય પુરોત્તમં ભવનાભ્યન્તરં પ્રવિષ્ટં વિનષ્ટનિખિલતાપઃ પ્રણિપત્ય મૃત્યુઞ્જયં સમ્પ્રાપ્તદુરાપપ્રસાદશેષાભિમર્શપવિત્રિતગાત્રઃ પ્રકટનિરુપમાનન્દતુન્દિલાન્તરાત્મા શનૈર્નિર્ગચ્છામિ । એવમેવ દિવસેદિવસે દેવદેવેશં શ્રીમચ્છ્વેતારણ્યપુરનાયકં મહેશ્વરં નિષેવમાણોઽહમવિકલવિત થમાયુરભિલષિતમશેષમદોષાનુષઙ્ગમનુપસર્ગમપવર્ગસુખં ચ સમ્યગવાપ્નુયામ્ ॥ ૧૯॥

આધત્તે ચતુરોઽપિ યૈવ ન ચિરાદર્થાન્ યથેચ્છં સતા
માહુર્યામૃષયો ગરીયસિતરામાદ્યાં વિમુક્તેરપિ ।
તામેતાં ભવદઙ્ઘ્રિપદ્મવિષયામેકાન્તભક્તિં મમ
શ્વેતારણ્યપુરાધિનાથ ભગવન્ દેયા દયાવારિધે ॥ ૨૦॥

॥ ઇતિ શ્રીશ્વેતારણ્યસ્તુતિઃ સમ્પૂર્ણા ॥

॥ શ્રી બ્રહ્મવિદ્યામ્બિકાસમેત શ્રીશ્વેતારણ્યેશ્વરસ્વામિને નમો નમઃ ॥

Swetharanyeswara, Mercury planet, Budhagraha

Proofread by Musiri Janakiraman

*Shri Shvetaranya Stutih*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*